শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - ९२

*कर्ममिश्रभक्तिस्वरूपवर्णनम्*

वेदैस्सर्वाणि कर्माण्यफलपरतया वर्णितानीति बुध्वा
तानि त्वय्यर्पितान्येव हि समनुचरन् यानि नैष्कर्म्यमीश।
मा भूद्वेदैर्निषिद्धे कुहचिदपि मनः कर्मवाचां प्रवृत्ति-
र्दुर्वर्जं चेदवाप्तं तदपि खलु भवत्यर्पये चित्प्रकाशे॥ १ ॥

यस्त्वन्यः कर्मयोगस्तव भजनमयस्तत्र चाभीष्टमूर्तिं
हृद्यां सत्त्वैकरूपां दृषदि हृदि मृदि क्वापि वा भावयित्वा।
पुष्पैर्गन्धैर्निवेद्यैरपि च विरचितैः शक्तितो भक्तिपूतै-
र्नित्यं वर्यां सपर्यां विदधदयि विभो त्वत्प्रसादं भजेयम्॥ २ ॥

स्त्रीशूद्रास्त्वत्कथादिश्रवणविरहिता आसतां ते दयार्हा-
स्त्वत्पादासन्नयातान् द्विजकुलजनुषो हन्त शोचाम्यशान्तान्।
वृत्त्यर्थं ते यजन्तो बहुकथितमपि त्वामनाकर्णयन्तो
दृप्ता विद्याभिजात्यैः किमु न विदधते तादृशं मा कृथा माम्॥ ३ ॥

पापोयं कृष्णरामेत्यभिलपति निजं गूहितुं दुश्चरित्रं
निर्लज्जस्यास्य वाचा बहुतरकथनीयानि मे विघ्नितानि।
भ्राता मे वन्ध्यशीलो भजति किल सदा विष्णुमित्थं बुधांस्ते
निन्दन्त्युच्चैर्हसन्ति त्वयि निहितमतींस्तादृशं मा कृथा माम्॥ ४ ॥

श्वेतच्छायं कृते त्वां मुनिवरवपुषं प्रीणयन्ते तपोभि-
स्त्रेतायां स्रुक्स्रुवाद्यङ्कितमरुणतनुं यज्ञरूपं यजन्ते।
सेवन्ते तन्त्रमार्गैर्विलसदरिगदं द्वापरे श्यामलाङ्गं
नीलं सङ्कीर्तनाद्यैरिह कलिसमये मानुषास्त्वां भजन्ते॥ ५ ॥

সোযং কালেযকালো জযতি মুররিপো যত্র সঙ্কীর্তনাদ্যৈ-
নির্যত্নৈরেৱ মার্গৈরখিলদ ন চিরাত্ত্বৎপ্রসাদং ভজন্তে।
জাতাস্ত্রেতাকৃতাদাৱপি হি কিল কলৌ সম্ভৱং কামযন্তে
দৈৱাত্তত্রৈৱ জাতান্ ৱিষযৱিষরসৈর্মা ৱিভো ৱঞ্চযাস্মান্॥ ৬ ॥

ভক্তাস্তাৱৎ কলৌ স্যুর্দ্রমিলভুৱি ততো ভূরিশস্তত্র চোচ্চৈঃ
কাৱেরীং তাম্রপর্ণীমনু কিল কৃতমালাং চ পুণ্যাং প্রতীচীম্।
হা মামপ্যেতদন্তর্ভৱমপি চ ৱিভো কিঞ্চিদঞ্চদ্রসং ত্ব-
য্যাশাপাশৈর্নিবধ্য ভ্রময ন ভগৱন্ পূরয ত্বন্নিষেৱাম্॥ ৭ ॥

দৃষ্ট্ৱা ধর্মদ্রুহং তং কলিমপকরুণং প্রাঙ্মহীক্ষিৎ পরীক্ষি-
দ্ধন্তুং ৱ্যাকৃষ্টখড্গোপি ন ৱিনিহতৱান্ সারৱেদী গুণাংশাৎ।
ত্বৎসেৱাদ্যাশু সিধ্যেদসদিহ ন তথা ত্বৎপরে চৈষ ভীরু-
র্যত্তু প্রাগেৱ রোগাদিভিরপহরতে তত্র হা শিক্ষযৈনম্॥ ৮ ॥

গঙ্গা গীতা চ গাযত্র্যপি চ তুলসিকা গোপিকাচন্দনং তৎ
সালগ্রামাভিপূজা পরপুরুষ তথৈকাদশী নামৱর্ণাঃ।
এতান্যষ্টাপ্যযত্নান্যযি কলিসমযে ত্বৎপ্রসাদপ্রৱৃদ্ধ্যা
ক্ষিপ্রং মুক্তিপ্রদানীত্যভিদধুৱৃষযস্তেষু মাং সজ্জযেথাঃ॥ ৯ ॥

দেৱর্ষীণাং পিতৄণামপি ন পুনরৃণী কিঙ্করো ৱা স ভূমন
যোসৌ সর্ৱাত্মনা ত্বাং শরণমুপগতস্সর্ৱকৃত্যানি হিত্ৱা।
তস্যোৎপন্নং ৱিকর্মাপ্যখিলমপনুদস্যেৱ চিত্তস্থিতস্ত্ৱং
তন্মে পাপোত্থতাপান্ পৱনপুরপতে রুন্ধি ভক্তিং প্রণীযাঃ॥ ১০ ॥

**********